International Journal of Sanskrit Research 2015; 1(4): 134-138

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2015; 1(4): 134-138
© 2015 IJSR
www.anantaajournal.com
Received: 17-03-2015
Accepted: 22-04-2015

**डॉ0 स्नेहलता**
व्याख्याता, एस. पी. एस. सेमिनरी
+2 स्कूल, सोनपुर, बिहार, भारत

# नाटककारहर्षस्य कृतित्त्वम्

## डॉ0 स्नेहलता

**प्रस्तावना**

संस्कृतनाट्यसाहित्ये हर्षवर्धनस्य महत्वपूर्णं स्थानम् अस्ति । अयं भारतस्य प्रसिद्धः सम्राट तथा कान्यकुब्जेश्वरः आसीत् । सः 606 ईस्वीतः आरभ्य 648 (षट्अष्टचत्वारिंशत्) ईस्वीं यावत् शासनं कृतवान् आसीत् । सः यत्र बाणभट्टं मयूरप्रभृति-कवीन् आश्रयं प्रदाय संस्कृतसाहित्यस्य समृद्धौ योगदानं कृतवान् तत्रैव स्वयं साहित्यसर्जनं कृत्वा भारतीं (सरस्वतीम्) सेवितवान् । तस्य जीवनस्य परिचयः बाणभट्टरचित हर्षचरितेन, तथा चीनी यात्रिणा ह्वेनसांगस्य यात्राविवरणेन प्राप्यते । अनया सामग्रया अस्यपितुः नाम प्रभाकरवर्धनः तथा मातुः नाम यशोमती आसीत् । तस्य भगिन्याः नाम राजश्रीः आसीत् यस्याः विवाहः मौखरी-नरेशग्रहवर्मणा सह अभवत् । तस्य अग्रजः महाराजः राज्यवर्ध्नः आसीत् । परन्तु सः अधिकदिनानि यावत् शासनं कर्तुं न अशक्नोत्, परिणामतः महाराजः हर्षवर्द्धनः शासनसूत्रां गृहीतवान् । हर्षस्य राजधनी थानेश्वरः आसीत् । सः धीरः वीरः, चतुरः शासकश्च आसीत् । एतस्मात् अतिरिक्तं सः ललितकलानामपि उपासकः आसीत् ।

हर्षवर्द्धनेन रचिता तिस्रः नाट्यकृतयः प्राप्यन्ते- 'प्रियदर्शिका', 'रत्नावली', नागानन्दश्च' । आसु अत्र 'प्रियदर्शिका', 'रत्नावली' च नाटिके स्तः तथा नागानन्दः नाटकम् अस्ति । रत्नावल्याः कर्तृत्वविषये साहित्यसंसारे विदुषां मध्ये विवादोऽस्ति । केषाञ्चित् मतानुसारं रत्नावल्याः रचयिता हर्षः नास्ति । अपितु धावकः आसीत् । काव्यप्रकाशस्य काश्मीरीयसंस्करणे धवकस्य स्थाने वाणभट्टस्यापि नामोल्लेखः प्राप्यते । यस्याधारे विद्वांसः बाणभट्टमेव 'रत्नावल्याः' रचयिता इति मन्यते । परन्तु आधुनिकभारतीय विद्वांसः अनेनमतेन सम्मताः न सन्ति । तेषां मतानुसारं कृतीनां लेखकः हर्षवर्धनैव आसीत् । 'कुट्टनीमतस्य' रचयिता दामोदरगुप्तः स्पष्टतया रत्नावलीं हर्षस्य कीर्तिमेव स्वीकृतवान् अस्ति ।[1]

**हर्षस्य कृतित्वम् :**

संस्कृतसाहित्यतिहासे हर्षस्य तिस्रः नाट्यकृतयः प्रसिद्धाः सन्ति । भाषाशैली रचनाक्रमदृष्ट्या तदक्रमः एवं विधोऽस्ति- (1) प्रियदर्शिका, (2) रत्नावली, (3) नागानन्दम् च ।

यद्यपि उपर्युक्तनाट्यकृतीनां रचना विषये विदुषां परस्परं मतवैभिन्यं दृश्यते । केचन् रूपकत्रयस्य कर्तारं हर्षवर्धनं मन्यन्ते । अन्ये च धवकं केचन बाणभट्टं तथा अन्ये च भिन्न-भिन्न विद्वदजनान् ज्ञापयन्ति ।

उपर्युक्तरुपकेषु भावभाषाशेल्यादीनां साम्यात् हर्षेव तेषांकर्ता बहुमान्या अस्ति ।

- **कृतीनां परिचयात्मकं विवरणम् :**

1) **प्रियदर्शिका :-** प्रियदर्शिका हर्षस्य प्रथमा कृतिः अस्ति । इयं चतुर्णाम् अंकानां लघुप्रणयनाटिका अस्ति । अस्याः कथानक उदयनस्य कथाचक्रे आधृतम् अस्ति ।

**Corresponding Author:**
**डॉ0 स्नेहलता**
व्याख्याता, एस. पी. एस. सेमिनरी
+2 स्कूल, सोनपुर, बिहार, भारत

यत् कालिदासस्य समयेऽपि प्रचलितम् आसीत् यस्योल्लेखं कालिदासोऽपि कृतवान् अस्ति–

'प्राप्यावन्तीनुदयन कथा कोविद ग्राम वृद्धान्'

प्रियदर्शिकाया: कथानकं तावत् सौन्दर्यपूर्णं गत्यात्मकं च नैव प्रस्तुतं कृतवान् अस्ति यावत् भवितव्यं प्रियदर्शिका नाटिकाया: संक्षिप्तकथानकम् एवं विधम् अस्ति ।

**प्रथमाङ्कगतं कथानकम्–**

महाराजस्य उदयनस्य पत्न्या: नाम वासवदत्ता अस्ति । वत्सराजस्य सेनापति: विजयसेन: दृढ़वर्मण: कन्यां प्रियदर्शिकां राजसभायाम् आनीय राज्ञं विन्ध्य: केतो: कन्यारूपां ददाति । महाराज: उदयन: स्वकीय पत्न्या: वासवदत्ताया: संरक्षणे समर्पयति । या तस्या: शिक्षाया: प्रबन्धं करोति । एकदा कलिङ्गनरेश: दृढ़वर्मणम् आक्रम्य तं कारागारे निगडितवान् तदानीं दृढवर्मण: कञ्चुकी प्रियदशिकां विन्ध्यकेतो: पार्श्वे त्यक्तवान् आसीत् । यदा वत्सराज: सेनापति: विन्ध्येतुम् आक्रम्य तं हंतवान् तत् नायिका प्रियदर्शिका तेन प्राप्तायां स: उदयनाय प्रत्यर्पितवान् ।

**द्वितीयाङ्कस्य कथानकम् :**

अस्मिन् अङ्के सम्यान्तरालोपरान्तं प्रियदर्शिकायुवावस्थां प्राप्नोति । एकदा राजा उदयन: निजमित्रेण विदुषकेन सह उपवने भ्रमणाय गच्छति तत्रैव च नायिका प्रियदर्शिका अपि पुष्पाणि चेतुम् आगच्छति । तया सह चेटि इन्द्रिवरिका अपि आगता आसीत् या तस्या: किञ्चित् दूरे पुष्पाणि चिनोति स्म । सहसा केचन् भ्रमरा: प्रियदर्शिकाया: उपमुखं परिभ्रमितुम् आरब्धवन्त: यस्मात् प्रियदर्शिका उद्विगना सञ्जाता । स्वकीयं मुखं च उत्तरीयेण आच्छाद्य सहायतार्थं चेटिम् इन्दिवरिकाम् आह्वयति । विदूषकस्य परामर्शेण राजा तदन्तिकं गत्वा तिष्ठति । राजानं इन्दिवरिकां ज्ञात्वा प्रियदर्शिका संगृहणाति । यदा सा निजोत्तरियम् अपसारयति तत् राजानं दृष्ट्वा सहसा पृष्ठत: तिष्ठति ।इन्दिवरिकां च पुन: आह्वातुम् आरभते तदानीं विदुषक: कथयति यत् तदा राजा स्वयं सहायतार्थम् उपस्थितोऽस्ति तदा चेटिम् इन्दिवरिकाम् आह्वानस्य का आवश्यकता ? अत्रैव नायकनायिके अन्योन्य सौन्दर्येण प्रभावितौ भवत: तथा कवि: प्रेमवीजं वपति । तदानीं तत्र अन्यत: आगच्छन्ति दृश्यते । राजा विदुषकश्च तत: पलायेते इन्दिवरिकया सह प्रियदर्शिका अपि गच्छति ।

**तृतीयाङ्कस्य कथानकम्:**

अत्राङ्के महाराजश्रीहर्ष: गर्भाङ्कस्य सुन्दरं निवेषं कृतवान् अस्ति । कौमुदी महोत्सवस्य उपलक्ष्ये महाराज्ञी वासवदत्ता उदयनस्य चरिते आधृतस्य एकस्य एकस्य नाट्कस्य अभिनयं कारयितुम् इच्छति स्म । वासवदत्ताया: उपदेशिका सांकृत्यायिनी नाम्नि, परिव्राजिका एकं नाटकं लिखितवती अस्ति । तत्र नाटके प्रियदर्शिकाया: सखीन् मनोरमाम् उदयनस्य रूपे तथा प्रियदर्शिकां वासवदत्ताया: रूपे प्रस्तुती करणीयम् आसीत् । परन्तु विदुषक: तथा मनोरमाया: कूटनीतिक चरितेन मनोरमाया: स्थानं स्वयं राजा उदयन: वेषं परिवर्तव्य रङ्गमञ्चे उदयनस्य रूपे अभिनयं प्रारभते परन्तु शीघ्रमेव वासवदत्ता सन्देहं करोति सा च उदयनं परिचिनोति । एवं विधाया: घटनार्थं सा अरण्यकां (प्रियदर्शिकां) तथा विदुषकम् अपराधयुक्तौ मन्यते उभौ च कारागारे निक्षिपति । वन्दिगृहे आरण्यकं (प्रियदर्शिका) मृत्युवरितुम् इच्छति । परन्तु ताम् एतत् न कर्तुं मनोरमा तां बोधयति ।

**चतुर्थअङ्कस्य कथानकम्:**

चतुर्थाङ्के महाराज्ञी वासवदत्ता चिन्तितमुद्रायां दृश्यते । तस्या: चिन्तिताया: कारणम् इदम् अस्ति यत् तस्या: मातृ: स्वस्रु: (भगिन्या:) पतिं दृढ्वर्माणं कलिङ्गराज: कारागारे निक्षिप्तवान् आसीत् । वासवदत्ताया: मातु: अङ्गा रवत्या: पत्रम् आगताम् आसीत् । यत् त्वं निजपतिम् उक्त्वा स्वकीयं मातृ भगिनीं पति मुक्तं कारय तदानीम् उदयन: तत्र आगच्छति । वासवदत्तायाश्च चिन्ताया: कारणं ज्ञात्वा तदमुक्ते: वचनं ददाति । राजा उदयनस्य सेनापति कलिङ्म् आक्रम्य कलिङ्गनरेशं हन्ति । दृढवर्माणं च मुक्तं कारयति । दृढवर्मण: कञ्चुकी उदयनस्य समीपम् आगच्छति । दृढ़वर्मण: सन्देशं च राजानाम् उदयनं वेदयति यत् स: स्वकीय कन्याया: पाणि ग्रहणं भवता सह कर्तुम् इच्छति स्म । तां च विन्ध्यकेतो: पार्श्वे न्यासवत् (न्यासरूपेण) त्यक्तवान् आसीत् परन्तु इदानीं प्रत्यागत्य समुपस्थिते तत्र कोऽपि न मिलित: तदानीम् एव मनोरमा आगत्य सूचयति यत् प्रियदर्शिका (आरण्यका) विषपानं कृतवती । तदानीं च कञ्चुकी प्रियदर्शिकां दृष्ट्वा परिचिनोति । वासवदत्ता इदमपि ज्ञायते यत् इयं तस्या: भगिनी अस्ति । उदयन: प्रियदर्शिकाया: विषप्रभावं दूरी करोति तथा वासवदत्ता उदयनेन सह प्रियदर्शिकाया: विवाहं करोति । अत्रैव नाटकं समाप्यते ।[2]

- **समीक्षणम्:**

श्रीहर्षस्य इयं नाटिका प्रौढ़तां न प्राप्तवती तथापि महत्वपूर्णा नाट्यकृति: अस्ति । नाटिकाया: नायक: उदयन: धीरललीत कोटे: (श्रेणी:) अस्ति । अत्र स्त्रीपात्राणां बहुलता अस्ति या स्वाभाविके रूपेण पर्याप्ता अस्ति । नायकस्य उदयनस्य पत्न्या: वासवदत्ताया: चरित्रम् उदात्तम् अस्ति । परन्तु तस्या: ऋजुताया: लाभं प्राप्य चेटय: गान्धर्वविवाहस्य आयोजने सफला: भवन्ति । प्रियदर्शिकाया: प्रधानरस: शृंगारोऽस्ति । अनेन साहचर्येण अन्येषां रसानामपि प्रयोग: विहितोऽस्ति । प्रियदर्शिकायां सङ्गीतमयी शैली दृश्यते तथैव अङ्लकारानां छन्दसां लोकोक्तिनां प्रयोगमपि कवि: अवसरानुकुलं कृतवान् अस्ति । प्रियदर्शिकानाटिकाया: कथानकं रत्नावल्यां मालविकाग्निमित्रे च आधारितं भूतेऽपि कवि: केषाञ्चित नूतनतत्त्वानां समावेषमपि कृतवान् अस्ति । यथा–

1) पुष्पचयनसमये अज्ञातभावे नायिका द्वारा नायकस्य आलम्बनम्।
2) गर्भाङ्केन नायकनायिकयो: पुनर्मेलनम् ।
3) वासवदत्ताया: मातु: पुत्रप्राप्ति: ।
4) नायकेन वासवदत्ता प्रसादय नायिकां कारागारात् मुक्तिं तथा नायिका द्वारा विषपानम् कृते तस्य प्रभावस्य नायकद्वारा समापनम् । प्रवृत्तिनां नवीनतत्त्वानां प्रयोगं कृत्वा कवि: संस्कृतसाहित्याय नवविधिं प्रदत्तवान् अस्ति) ।[3]

**रत्नावली:**

महाराजश्रीहर्षस्य द्वितीयानाट्यकृति: रत्नावली अस्ति । अस्य कथानकं प्रियदर्शिकया इव उदयनेन सम्बद्धम् अस्ति । यम् अपि च चतुर्षु अङ्केषु विभक्ता अस्ति । उदयनस्य मंत्री यौगन्धरायणोऽस्ति । मंत्री महोदय: दैवज्ञै: ज्ञातवान् यत् सिंहलेश्वरस्य राजकन्यया रत्नावल्या सह राज्ञ: पाणिग्रहणं भविष्यति राजा च चक्रवर्ती सम्राट भविष्यति । अत: मन्त्री यौगन्धरायण: लावाणके वासवदत्ताया: दग्धाया: असत्यसमाचारं प्रेषयित्वा उदयनेन सह अपि पाणिग्रहणाय सिंहलराजं तस्य कन्यां रत्नावलीं याचते । सिंहलराज: स्वकीयकन्यां रत्नावलीं ददाति । परन्तु संयोगवशात् रत्नावलीम् आदाय आगच्छन् जलपोत: भग्न: भवति । रत्नावली च काष्ठफल्कस्य आश्रयं गृहित्वा रक्षितां भवति । यौगन्धरायणस्य पार्श्वे च आनीयते । यौगन्धरायण: गुप्तरूपेण तस्या: नाम परिवर्तितं कृत्वा तां सागरीकाया: रूपे वासवदत्ताया: पार्श्वे परिचारिकाया: रूपे रक्षति । स्वयं च तस्य कालस्य प्रतिक्षां करोति । यत् यावत् उदयन: स्वयं सागरीकां प्रति आकृष्ट: न भवेत् । अस्मादेव नाटिकाया: प्रारंभ: भवति ।

**प्रथमाङ्कस्य कथानकम् :**

कामदेवस्य उत्सवस्य अवसरे राज्ञ: उदयनस्य पत्नी वासवदत्ता कामरुपस्य राज्ञ: उदयनस्य सद्य: पूजां करोति । सागरीका इमम् उत्सवं वृक्षाणाम् अन्तर्हितेन दृष्ट्वा विचारयति यत्र अत्र तु कामदेवस्य सशरीर पूजा भवति । सापि स्वचयनकृतपुष्पै: तस्मादेव कामदेवस्य पूजां करोति तदानि सा वैतालिकस्य गीतेन इदं जानाति यत् यस्य पूजा भवति स: स्वयं महाराज: उदयन: अस्ति येन सह विवाहार्थम् अहं पित्रा अत्र प्रेषिता आसीत् । उदयनस्य स्वरूपं दृष्ट्वा सागरीकाया: मनसि प्रेमभावस्य सञ्चार: भवति सा च उदयनं प्रति अनुरक्त भवति ।

**द्वितीयअङ्कस्य कथानकम् :**

कामसन्तप्त: सागरिका: चित्तविनोदार्थं कदली गृहे समुपविश्य चित्रफलके राज्ञ: उदयनस्य चित्रं निर्माति तदानीमेव तस्या: सखी सुसंगता अपि सारिकापञ्जरेण तत्रागच्छति । सा चित्रफलके उदयनस्य चित्रं दृष्ट्वा तस्यैव समीपे सागरिकाया: चित्रं निर्माति । सागरीका स्वप्रेमगाथाया: सम्बन्धे सुसंगतां ज्ञापयति । सुसंगतया आनीता सारिका पक्षिरपि सर्वं वार्तालाप श्रृणोति तदानीमेव वाशालात: बन्धनं क्षित्वा एक: वानर: प्लायते । राजभवने च कोलाहलं भवति । इदं कोलाहलं श्रुत्वा उभे तत: प्लायेते चित्रफलकं च तत्रैवत्यक्तम् । वानर: तत्र आगच्छति पञ्जरत: च सारिकां मुक्तां करोति । पक्षी उड्डीय वृक्षोपरि तिष्ठति । इदानीमेव राजा स्वमित्रेण विदूषकेन सह भ्रमन् तत्र आगच्छति । स: चित्र फलकं

प्राप्नोति । यत्र तेषां चित्रेण सह एकस्या: अपूर्वसुन्दर्या: चित्रम् अङ्कितमस्ति । वृक्षोपविष्टा सारिकाप्रणयस्य संदेशं ददाति येन राजा प्रकामं प्रभावित: भवति । इदानीं सुसंगता चित्रफलकं ग्रहणार्थस्य राज्ञ: उदयनस्य सागरिकायाश्च साक्षात्कारं कारयति तदानीं वासवदत्ता तत्र आगच्छति तस्मिन् चित्रफलके च राज्ञा सह सागरीकाया: चित्रं दृष्ट्वा कुपिता भूत्वा गच्छति । राजा विदूषकश्च तां प्रसादयितुं गच्छत: ।

**तृतीयाङ्कस्य कथानकम् :**

अस्मिन् अङ्के कवे: मौलिकताया: अनुभूतेश्च सम्यक् निदर्शनं सञ्जातम् अस्ति । इदम् अङ्कं नाटिकाया: हृदयस्थम् अस्ति । अत्राङ्के वास्तविक-अवास्तविक रूपपरिवर्तनम् इत्थं घटते यत् घटना शाङ्कर्यस्य फलम् अतीवसुन्दरं भवति । अस्मिनाङ्के राजा सागरीकाया: प्रणये एतावान् आशक्त: दृश्यते यत् तां द्रष्टुं व्याकुलि भवति । स्वकामसन्तापं च गोपयितुं स्वकीयास्वस्थताया: समाचारं प्रश्रुतं कृतवान् । विदूषक: (वसन्तक:) सुसङ्गतया सम्मेलनं कृत्वा एकां योजनां रचयति यत् अद्य रात्रे: प्रथमप्रहरे माधवीलतामण्डपे वासवदत्ताया: वेशे सागरिकाया: राज्ञा सह मेलनं कार्यं अनयो: उभयो: इमां गुप्तयोजनां वासवदत्ताया: चेटि काञ्चनमाला प्रच्छना भूत्वा श्रृणोति । समग्रां वार्तां च वासवदत्तायै निवेदयति । राजा उदयन: रात्रे: प्रथमप्रहरे लतामण्डपं गच्छति तत्र च वासवदत्ता आगच्छति। अन्धकारे वासवदत्तां राजा सागरिकां ज्ञात्वा प्रेमगीतं गातुम आरभ्ते ।इदं वासवदत्तायै न रोचते स्म । वासवदत्ता राजानम् आक्षिपति यत् भवान् सागरिकाया: प्रेमपाशेन निबद्धोऽस्ति । राजा सहसा लज्जित: भवति । वासवदत्तां क्षमाप्रार्थनां करोति । चिन्तिता वासवदत्ता तत: प्रस्थते । अन्यत्र सागरिका यदा इदं जानाति तत् सा कण्ठपासेन आत्महत्यां कर्तुम् उद्यता भवति । एकत: राजा विदुषकेन सह आगच्छति । वासवदत्ताया: वेशे सागरिकां वासवदात्तां ज्ञात्वा तां पाशयोजनाया: वारयति । सागरिका राजा च अन्योन्यं परिचिनुत: । राजा सागरिका च परस्परं प्रेमलापं कर्तुंम् आरभते । इत: वासवदत्ता पुन: प्रत्यागत्य लता मण्डपे उपस्थिता भवति परन्तु तत्र राज्ञ: सागरिकया प्रेमालपं दृष्ट्वा कुपिता भवति । राजा तां कथयति यत् इमां सह वासवदत्तां ज्ञात्वा प्रेम कृतवान् किन्तु कुपिता वासवदत्ता विदूषकं सागरिकां च लतापाशेन बद्धौ कारयति ।

**चतुर्थाङ्कस्य कथानकम् :**

निगडित जीवने सागरिका कानिचित् पुण्यफलानि प्राप्तुम् इच्छति एतदर्थ सा स्वपित्रा प्रदत्तां रत्नावलीं सुसंगतायै ददाति यत् सा कस्मै ब्राह्मणाय दद्यात् (ददातु) सुसंगता तां रत्नावली विदुषकाय प्रयच्छति । विदूषकश्च तां प्राप्य प्रसन्न: भवति तथा राजा प्रोक्ते तां परिदधाति इत: वासवदत्ता स्वकीय

पतिं सागरिकाया: प्रेमपाशात् मौक्तुम् इच्छति । एतदर्थम् एव तां भूगर्भे निगडितां कारयति । सर्वत्र असत्यसमाचारां प्रसारयति यत् सागरिका उज्जैनं गता ।एतन मध्ये एक: इन्द्रजालिक: राजसभायाम् उपस्थित: भूत्वा स्वकीयं इन्द्रजालं प्रति राजानम् उदयनं राज्ञिं वासवदत्तां च अति प्रभावितौ करोति ।

स्वकीयइन्द्रजालं च दर्शयति । तदानीमेव प्रतिहारी द्वारा यं सूचना प्राप्यते यत् सिंहलनरेश: विक्रमबाहो: मन्त्री बशुभूति तथा बाभ्रव्य नामक: कञ्चुकि मेलनम् इच्छत: राज्ञया मेलनसमये वसुभूति: विदूषकस्य कण्ठे विद्यमानं रत्नावलीं परिचिनोति । तथा रत्नावलीम् आनेतृ नौका दुर्घटनाया: सम्पूर्णघटना क्रमं बोधयति । वासवदत्ता यदा ज्ञायते यत् रत्नावली तस्या: भगिन्या: पुत्री अस्ति तत् सा अतीव दु:खिता भवति तदानीम् अन्त: पुरे अग्नि: प्रज्वलित: भवति । वासवदत्ता राजानं रत्नावलीं रक्षितुं कथयति । राजा तां रक्षित्वा आनयति वासवदत्ता च प्रसन्नता पूर्वकं राजा उदयनेन सह

रत्नावल्याः विवाहं सम्पन्नं कारयति । अनेन मङ्गलमयवृतेन नाटकावसानं भवति ।[3]

- **समीक्षणम् :**

रत्नावली संस्कृतसाहित्यस्य एका विशिष्टा सफलं च नाटिका अस्ति ।शास्त्रीय पद्धत्या: अनुसारं नाटिका-नाटक प्रकरणयोः मिश्रणद्वारा निर्मिता एका रूचिरा नाट्यकृतिः अस्ति । नाटकस्य सदृशः एव अस्याः नायकः इतिहासप्रसिद्धः भवति तथा कथानकं प्रकरण इव कविकल्पितं भवति ।

श्रीहर्षः नाटिकायाः कथानकं भासस्य स्वप्नवासवदत्तं प्रतिज्ञायौगन्धरायण तथा लोकप्रचलित उदयनस्य कथाम् आधृत्य प्रस्तुति कृतवान अस्ति । तत्र सः स्वकीयमौलिकता नवीनकल्पना द्वारा अस्याः निर्माणं कृतवान् । श्रीहर्षः नाटिकायां पौतभङ्ग नायिका रत्नावल्याः नाम परिवर्तनं तथा उदयनस्यैव अन्तःपुरे निवासः वसन्तोत्सवे कामपूजन द्वारा नायिकायाः हृदये अनुरागस्य सञ्चारः नायिका सागरिकायाः चित्रफलकद्वारा नायकस्य हृदये अनुरागो उत्पत्तिः वेषपरिवर्तन-घटना, इन्द्रजाल तथा अन्तःपुरे अग्निप्रज्वलनं प्रवृत्तिघटना, श्रीहर्षस्य मौलिक उद्भावनाः सन्ति ।

नाटिकायाः पात्राणि उच्चकोटिकानि सन्ति । नायकः सौन्दर्यशाली, वीरः उदारमना, मृदुभाषी, कलाप्रेमी चास्ति । नायिका सागरीका (रत्नावली) मुग्धा अस्ति । अस्याः प्रधानरसः श्रृंगारोऽस्ति रसस्य परिपुष्ट्यर्थं गीततत्त्वमपि प्रयुक्तम् अस्ति ।

अनेन प्रकारेण इदं वक्तुं शक्यते यत् रत्नावली एका सफला नाटिका अस्ति । साहित्यशास्त्रे अस्याः नाटिकायाः प्रभुतानि उद्धारणानि प्राप्यन्ते ।[4]

**नागानन्दः**

महाराजश्रीहर्षद्वारा प्रणीतः नागानन्दः तस्य सफलः सर्वोत्कृष्टश्च नाट्यग्रन्थोऽस्ति । अस्य कथानकं पञ्चाङ्केषु विभक्तम् अस्ति । यत् संक्षेपेण निम्न प्रकारेण अस्ति ।

**प्रथमाङ्कस्य कथानकम् :**

जीमूतकेतुः विद्याधरानाम् अधिपतिः आसीत् । यदा सः वृद्धाः अवस्थायां वाणप्रस्थ आश्रमस्य सेवनं कर्तुं सपत्नीकः गन्तुम् उद्यतः तदा तेन सह तस्य पुत्रस्य नाटकस्य च जीमूतवाहनस्य अपि विरागः सञ्जातः । सोऽपि पितृराजस्य परित्यागं कृत्वा तत्रैव सेवार्थं गच्छति । वनं गत्वा पितृ भक्तः

जीमूतवाहनः पितुः आज्ञया निवासयोग्यं सुन्दरं स्थानम् अन्विष्ण विदूषकेन सह मलयपर्वतस्य सुरम्य वातावरणं दृष्ट्वा मुग्धः भवति तदानीं सः मनोहरं हृदयहारी च गीतं श्रृणोति । गीतस्य स्वर तरङ्गे न आकर्षितं भूत्वा शनैः शनैः सः पार्वति मन्दिरस्य पार्श्वे गच्छति तत्र मन्दिरस्य अन्तः राजकुमारी मलयवती वीणां वादयन्ती गायति स्म । जीमूतवाहन निकुञ्जाभ्यन्तरे प्रच्छन्नं भूत्वा राजकुमार्याः मलयवत्याः गायनं तथा चेट्या सह तस्याः वार्तालापमति श्रृणोति ।

मलयवती चेटीं ज्ञापयति यत् गौरी देवी वरं दत्तवती यत् तस्याः परिणयः विद्याधर चक्रवर्तिनः भविष्यति । इमं वार्तालापं श्रुत्वा जीमूतवाहनः मलयवत्याः समक्षम् आगच्छति । तं दृष्ट्वा मलयवती प्रणये निमग्ना तथा लज्जासिक्ता भवति तदानीं कुलपतेः आज्ञानुसारं एकः तपस्वी कुमारः आगत्य मलयवतीम् आहुय नयति । मलयवती स्वहृदये प्रेमाङ्कुरं गृहीत्वा गच्छति । इतः राजकुमारः जीमूतवाहनस्य हृदयेऽपि प्रेमसञ्चारः भवति अस्मिन् पारस्परिक प्रेम विह्वलता प्राप्ते: जीमूतवाहनस्य मित्रं विदूषकः आनन्दम् अनुभवति ।

**द्वितीयाङ्कस्य कथानकम् :**

राजकुमारी मलयवती कामसन्तपता अस्ति । सा गृहात् चेटिभिः सह चन्दन लताया गृहे गच्छति । तत्र तस्याः वियोगपीडायाः शान्त्यर्थं चेटी तस्याः हृदयस्थले चन्दनस्य लेपं करोति परन्तु तेन तस्याः हृदयस्य तापं न्यूनं न भवति प्रत्युत वर्धतेव ।

कमपीड़ितः राजकुमारः जीमूतवाहनोऽपि मनोरञ्जनार्थं तत्रैव चन्दनलतागृहे विदुषकेन सह गच्छति तं दृष्ट्वा मलयवती लतान्तः प्रयछन्ना भवति । राजकृमारः विदुषकं कथयति यत् सः रात्रौ स्वप्ने अतैव चन्दनलता गृहे ताम् उपालम्भं ददतिं दृष्टवान् अस्ति । एतदर्थं सः अत्र स्थाने चित्तस्य शान्तिहेतवे आगतोऽस्ति । तत्रैव सः मलयवत्या चित्रे लिखित्वा स्वमनोविनोदं करोति । तदानीं मलयवत्याः भ्राताः सिद्धकुमारः मित्रावसुः तत्र आगत्य कथयति यत् पितृचरण भवता सह मलयवत्याः विवाहं कर्तुम् इच्छति । परन्तु राजकुमारः प्रस्तुतं प्रस्तावम् अस्वीकरोति मतः इदं तेषां कृते ज्ञातं नास्ति यत् यस्याः प्रणये सः एतावान् अनुरक्तोऽस्ति तस्याः नाम मलयवती एवास्ति तदानीं राजकुमारस्य मित्रम् आत्रेयः मित्रावसुं राजकुमारस्य पितुः पार्श्वे स्वीकृत्यर्थं प्रेषयति ।

इतः मलयवती राजकुमारस्य अस्वीकृत प्रस्तावं श्रुत्वा आत्महत्यां कर्तुम् उद्यता भवति । तस्याः इदं कार्यं दृष्ट्वा चेटि कोलाहलं करोति । कोलाहलं श्रुत्वा राजकुमारः जीमूतवाहनः धवित्वा मलयवत्याः पार्श्वे गच्छति तां च धृत्वा स्वपूर्वरचित चित्रस्थाने आनीय तस्याः चित्रं दर्शयति तत्रैव उभयो गान्धर्वविवाहः भवति तदानीं तत्र एका चेटि आगच्छति ज्ञापयति च यत् राजकुमारस्य जीमूतवाहनपितरौऽपि विवाह-प्रस्तावस्य अनुमोदनं कृतवन्तौ स्तः । अद्यैव तत् कार्यं च सम्पन्नं भविष्यति । सर्वे जनाः स्नानादि कार्यार्थं गच्छन्ति ।

**तृतीयाङ्कस्य कथानकम् :**

राजकुमारस्य जीमूतवाहनस्य तथा राजकुमार्याः मलयवत्याः विवाहोत्सवस्य उपलक्ष्ये सर्वे जनाः आमोद-प्रमोदं अनुभवन्ति तत्पश्चात् शेखरकनामकः विटोऽपि मदिरापानं कृत्वा चेटेन सह कुसुमाकर उद्याने स्वप्रीयतमा नवमलिकां अन्वेशण तत्र आगच्छति तत्रैव विदुषकोऽपि स्ववेषं स्त्रीरूपे परिवर्तितं करोति । शेखरकः विदुषकम् एव नवमालिकाम् ज्ञात्वा तेन सह प्रेमालापस्य व्यवहारं कर्तुम् आरभते । तदानीम् एव नवमालिकां अपि तत्र आगच्छति । विदुषकं च परिचिनोति तथा विटोऽपि नवमालिकं परिचिनोति विदुषकोऽपि स्वकीय मूलरूपे भवति । इदानीम् उभौ मिलित्वा विदूषकेन सह हास-परिहासं कुर्वतः विदुषकः येन केन प्रकारेण ताभ्यां मध्यात् स्नानार्थं गच्छति ।

जीमूतेन सह मलयवती अपि उद्याने आगच्छति । तया सह सख्यः सेवक सेविकाश्च सन्ति । नायक नायिके स्फटिक शिलायाम् उपविशतः नायकः नायिकायाः रूपस्य गुणस्य च प्रशंसा करोति ।

चेटि च तस्य मुखं तमालपल्लवस्य रसेन कृष्णं करोति । या नायकेन परिहासकृते विदूषकः कुपितः भूत्वा ततः प्रस्थानं करोति चेटि तं प्रसादयितुं गच्छति ।

किञ्चितकालान्तरं कुमारः मित्रावसु आगत्य जीमूतवाहनं सूचयति यत् भवतः राज्ये मतङ्गनामकः शत्रुः अधिकृतवान् अस्ति । अनेन समाचारेण जीमूतवाहनः खिन्नः भावस्थानं हर्षितः भवति । तथा मित्रावसु द्वारा क्रोधं क्रकटी कृते शान्त्युपदेशं ददाति ।

**चतुर्थाङ्कस्य कथानकम् :**

राजकुमारः जीमूतवाहनः मित्रावसुनः सह समुद्रतटे भ्रमणार्थं गतवान् तत्र अस्थिराशिं दृष्ट्वा जीमूतवाहनः आश्चर्यम् अनुभवति सः च अस्य सम्बन्ध मित्रावसुं पृच्छति मित्रावसु ज्ञापयति यत् नागराजः वासुकी गरुरात् भयात् तस्मै भक्षितुं प्रतिदिनम् एकनागम् उपस्थापयितुं सिद्धान्तं निर्मितवान् अस्ति । अतएव बहुकालात् पूर्वतः एव यं प्रथा चलं कारणात् अस्थिनां राशिः अभवत् । इमं वृतान्तं श्रुत्वा जीमूतवाहनः खिन्नः भवति चिन्तयति च अहमपि स्व जीवनम् उत्सृज्यं यदि एकस्य नागस्य प्राणान्त रक्षेयं तत् आत्मानं सौभाग्यशालिनं ज्ञास्यामि । तदैव मित्रावसु पित्रा आहवातुं सन्देशः प्राप्यते । सः च गृहं प्रति निर्वतते (प्रति गच्छति) जीमूतवाहनः तत् एकाकी भ्रमति तदानीमेव कस्यचित् वृद्धस्य रोदनं श्रुयते । तदन्तिकं गते ज्ञायते यत् तस्य एकल पुत्रं शङ्खचुडगरुरद्वारा खादितुं वारम् अस्ति ।

जीमूतवाहनः शङ्खचुडस्य स्थाने स्वस्य गमनस्य प्रस्तावं करोति परन्तु शङ्खचुडः एततकृते तत्परः न भवति तथा शङ्खचुडः रक्तवस्त्राणि परिधाप्य गोकरणेश्वरपूजनाय गच्छति एतत् मध्ये कञ्चुकी आगत्य जीमूतवाहनाय एकं रक्तं वस्त्रं ददाति कथयति च इमानि वस्त्राणि मित्रावसुः माता भवते परिधारणार्थं प्रेषितवती अस्ति । मनोवाञ्छित फल प्राप्ति सदृशं जीमूतवाहनः शीघ्रं तत् वस्त्रं परिधापयति तथा वधयस्थानं गत्वा उपविशति । गरुड़ः आकाशमार्गेण आगत्य वध्य स्थानात् जीमूतवाहनम् उत्थाप्य नयति। जीमूतवाहनस्य एवं विधस्य त्यागे परोपकारितायां च आकशात् देवैः पुष्पवृष्टिः कृता । दशः च द्रुम्दुभिघोषेण गुञ्जायमानाः अभवन् ।

**पञ्चमाङ्कस्य कथानकम् :**

जीमूतवाहनस्य समुद्रतटात् न प्रतिनिवर्तने महाराजः विश्वावासुः अतीव चिन्तिता भवति । स्वप्रतिहारी जीमूतवाहनस्य पितुः जीमूतकेतोः पार्श्वे प्रेषयति यत् किम् राजकुमारः भवतः पार्श्वे गतोऽस्ति ।जीमूतकेतोः विश्वावसोः सन्देशं शृण्वन् आसीत् । तदानीम् एव मांसेन सम्पृक्त जीमूतवाहनस्य एकः चूड़ामणिः जीमूतकेतोः समक्षं पतितः तं चुड़ामणिं दृष्ट्वा जीमूतवाहनस्य पितरौ तथा नववधुपत्नी मलयवती खिन्नाः भवन्ति । ते च जीमूतवाहनं विंशतः तपोवनात् बर्हिर्गच्छति । मार्गे तेषां मेलनं शङ्खचूडनामक नागेन भवति । यः तम घटितं पूर्वघटना क्रमं तथा महात्मनः जीमूतवाहनस्य त्यागस्यापि वर्णनं करोति । तस्यवार्तां श्रुत्वा जीमूतकेतोः दृढ़निश्चयः भवति । यत् सः व्यक्ति महात्मा जीमूतवाहनः एव आसीत् । इमं दुखदं समाचारं श्रुत्वा सर्वे जनाः अग्नौ प्रविश्य प्राणान् त्यक्तुम् इच्छन्ति परन्तु शङ्खचूडः तान् एतस्मात् कार्यात् वारयति तथा पतितेन रक्तचिन्हेन सर्वान् जनान् मलयपर्वते नयति । यत्र गरुड़ः जीमूतवाहनं भुङ्कते ।

शङ्खचूडः गरुड़ः कथयति यत् नागराजः वासुकी भवते भोजनार्थं माम् निश्चयं कृतवान् आसीत् परन्तु भवान् इमं राजकुमारं खादन् अस्ति सम्पूर्णं घटनाक्रमं ज्ञात्वा गरुड़ः पश्चातापं करोति । अग्नौ च प्रविश्य मरतुम् इच्छति । परन्तु जीमूतवाहनः तं एतत् कर्तुं निषेधति (निषिद्धतिम) तथा गरुड़ द्वारा त्रुटेः प्रायश्चित्तस्वरूपं भविष्ये सर्वविनाशं न कर्तुं वचनं गृहणाति । तत्पश्चात् निज-व्रणकष्टान् असहमानः त्रुटेः राजकुमारः प्राणान् त्यक्तुम् उद्यतः भवति । तं च जीवितं कर्तुं गरुड़ः अमृतम् आनेतुम् आकाशं गच्छति । तदानीमेव माता पार्वति प्रकटी भूत्वा कमण्डलुजलेन जीमूतवाहनं जीवितं करोति । तदानीमेव स्वर्गात् अमृतवर्षा भवति पूर्वमृताश्च सर्वे नागाः जीविताः भवन्ति । गौरी जीमूतवाहनस्य विद्याधर चक्रवर्ती पदस्य कृते अभिषेकं करोति । भरत वाक्येन नाटकं समाप्तु भवति ।[5]

**नागानन्दस्य विशिष्टता :**

संस्कृतनाट्य-साहित्ये नागानन्दः स्व अन्यतमं स्थानं रक्षति । नाटकस्य मुख्य विशेषता एवं विधा सन्ति ।

1) नाटकस्य नायकः जीमूतवाहनः राज्यं सुखं धनधान्यं सर्वाणि च परित्यज्य पित्रोः सेवार्थं वनं गच्छति ।
2) नायकद्वारा सर्पसदृश प्राणिनं रक्षितुं पितरौनवपरिणीतां पत्नीं च परित्यज्य निजप्राणान् गरुड़ाय समर्पयति ।
3) नायकद्वारा अंहिसा परमोधर्मः इत्यस्य न केवलं सैद्धान्तिकरूपेण अपितु व्यावहारिकतया पालन कृतम् अस्ति ।
4) नागानन्दे बहुधर्मस्य वैदिक धर्मस्य व समन्वयं दृश्यते ।[6]

हर्षस्य कृतीनाम् अनुशीलनेन तस्य पाण्डित्यं परिलक्ष्यते । सः स्वयं महाविद्वान् विद्वतप्रियः च आसीत् । तस्य शास्त्रीय ज्ञानस्य अनेकानि उदाहरणानि दृश्यन्ते । तदीय रचनासु काव्यशास्त्रे तु तस्य वैशारद्यं पदे-पदे दृश्यते । तस्य राजसभायां कवीनां विदुषां च समवायः आसीत् तस्य सम्बन्धे कालिदासस्य इयम् उक्तिः सर्वथा समीचीना भवितुम् अर्हति-

"निसर्गभिन्नास्पदमेकसंस्थमस्भिन्द्वयं श्रीश्च सरस्वती च ।"7

**सन्दर्भ-सूचिः :-**


1. आचार्यबलदेवउपाध्यायः संस्कृतसुकविसमीक्षा पृ0सं0: 237-38
2. हर्षवर्धनः प्रियदर्शिका पृ0सं0: 5-163
3. हर्षवर्धनः रत्नावली पृ0सं0: 11/247
4. डा0 गंगासागर राय संस्कृत के प्रमुख नाटककार पृ0सं0: 348 तथा उनकी कृतियाँ
5. हर्षवर्धनः नागान्दः पृ0सं0: 4-271
6. डा0 गंगासागरराय संस्कृत के प्रमुख नाटककार पृ0सं0: 354-355 तथा उनकी कृतियाँ
7. कालिदासः रघुवंशम् 6/29